अङ्क-२६
जुलाई-दिसम्बर २०१५

**वेदविद्या**
ISSN-2230-8962

# वैदिकसाहित्ये मानवीयमूल्यानामनुशीलनम्

**राजकुमार पिलवालः**

मूल-शब्दात् 'दृयत्' प्रत्यये कृते 'दृमूल्य' शब्दः सिद्ध्यति। कस्यचित् पदार्थस्य परिवर्त्ते देयं धनं पदार्थः वा मूल्यशब्दवाच्यो भवति। वस्तुतः एष शब्दः व्यापकः अस्ति। यतो हि पदार्थस्य उपयोगिता एतस्य आधाररूपेण विद्यते। अर्थतः, पदार्थस्य उपयोगितां महत्त्वं वा यो विशिष्टो धर्मः प्रतिपादयति सः 'दृमूल्य' पदेन बोध्यते।

मूल्यं व्यक्तेः जीवनस्य निर्देशकः सिद्धान्तोऽस्ति। मूल्यमाश्रित्य कश्चित् आत्मनः जीवनस्य दशां दिशं च निश्चिनोति। कर्तव्याकर्त्तव्यबोधः मूल्येनैव आगच्छति। मूल्यमेव जीवनस्य आधारभूताम् आवश्यकतां विविधव्यापारान् व्यवहारान् आचारांश्च नियमयति। एतत्तु निर्विवादमस्ति यत् मूल्यस्य मूले मनुष्य एव अस्ति, यतो हि मनुष्येण निर्मितस्य आदर्शाधारितजीवनस्य मानदण्डरूपेण मूल्यमेव विद्यते। मूल्येनैव मनुष्यः स्वस्य आचारविचारान् व्यवस्थापयितुं नियमयितुं च शक्नोति।

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः॥**

वेदो हि ज्ञानात्मकं शब्दब्रह्म। एभ्यः सकाशादेव समस्तानां ज्ञानविज्ञानानां, मानवीयसंस्कृतीनाञ्च अजस्रप्रवाहः इदानीमपि इमां भारतभूमिम् आप्याययति। इत्यत्र न हि कश्चन सन्देहलेशः। तथा च उक्तं मनुना—

**यः कश्चिद् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**

अपि च,

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।**
**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥**

आभ्यां श्लोकाभ्यां वेदानां सर्वविधज्ञानात्मकत्वं सुतरां प्रसिध्यति। शाब्दिकव्युत्पत्त्याऽपि विद्ज्ञाने धातोः घञ् प्रत्यये सति वेदशब्दः निष्पन्नो भवति। अनेनापि वेदस्य ज्ञानमयत्वं सुस्पष्टमेव। सोऽयं वेदः अस्माकं राष्ट्रकल्याणाय मानवमङ्गलाय च न केवलं लौकिकैरुपायैरैव अपितु अलौकिकोपायैरपि मर्त्यान् समुपकरोति। येन केनापि विधिना अस्य जगतीतलस्य प्राणिनां सर्वतोभावेन कल्याणं भवेत् इति परमोपलब्धिः वेदेनैव सम्भवति, न तु केनचिदन्येन इति निश्चप्रचम्। अतएव आचार्यसायणेन प्रोक्तं यत् - 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद।' तथा च,

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥**

अनेनेह वेदानां सर्वविधं मानवोपकारकत्वं ध्वनितम्। सोऽयमुपकारः मानवीयमूल्यानां निर्देशनेन वैदिकसाहित्ये सर्वत्र प्रतिपादितः। तत्र सर्वप्रथमम् अस्मिन् राष्ट्राजिरे यदि कस्यचिद् मानवस्य आविर्भावो भवति चेत् तत्र च आद्यत्वेन मातुः सकाशात् परमौषधं जीवनदायकं च स्तन्यं पयः प्राप्नोति। पयःपाने सति स च शिशुः पादाभ्यां मातरं ताडयति परञ्च सा माता न क्रुध्यति। सोऽयं शिशुः यौवनं प्राप्ते सति तत् स्वकीयमपराधं स्वीकुर्वन् अग्निं प्रार्थयति। तथा च उक्तं यजुर्वेदे (१९.११)

**यदा॑ पि॒पेष॑ मा॒तरं॑ पु॒त्रः प्रमु॑दितो॒ धय॑न् ।**
**ए॒तत्तद॑ग्नेअनृ॒णो भ॑वाम्यह॑तौ पि॒तरौ॑ मया॑॥**

अस्यायं भावो यत् हे अग्ने ! पुत्रोऽहं प्रमुदितः स्तनपानं कुर्वन् सन् मातरम् आपिपेष-पादाभ्यां पीडितवान् तत् एतत् त्वत् समक्षम् अहम् अनृणो भवामि एवं ब्रवीमि च यत् मया पितरौ-मातापितरौ न पीडितौ भवेताम्। यः पुत्रः प्रत्युपकर्तुमशक्तः स एव पित्रोर्हन्ता भवति। तैत्तिरीय-उपनिषद्यपि मातृदेवो भव, पितृदेवो भव इत्यादि वेदवचनैः मातापित्रोः श्रेष्ठतमत्वं प्रतिपादयन् इदमपि सङ्केतितं यत् अनयोराज्ञा सदा अनुपालनीया, आजीवनं सेवा च कर्तव्या। तथेत्थं मानवीयमूल्यानां निर्देशः अथर्ववेदेऽपि एवमस्ति, यद् गृहस्थजीवनं परस्परं सौहार्देन भवितव्यम्, यथा -

**अनु॑ व्र॒तः पि॒तुः पु॒त्रो मा॒त्रा भ॑वतु॒ संम॑नाः ।**
**जा॒या पत्ये॒ मधु॑मतीं॒ वाचं॑ वदतु शन्ति॒वाम् ॥**
**मा भ्राता॒ भ्रात॑रं द्विक्ष॒न् मा स्वसा॑र मु॒त स्वसा॑ ।**
**स॒म्यञ्चः॒ सव्र॑ता भू॒त्वा वाचं॑ वदत भ॒द्रया॑ ॥**

अस्य इदं तात्पर्यं यत् पुत्रः पित्रे सदा आनुकूल्यभावं भजेत् न प्रातिकूल्यम्। गोस्वामी श्रीतुलसीदासेनाऽपि प्रोक्तम् -

**सुनु जननी सोइ सुतबड़भागी ।**
**जो पितु मातु वचन अनुरागी ॥**

भ्रातरश्च पारस्परिकं वैरं विहाय सर्वदा सौहार्देनैव भवेयुः। भगिन्योऽपि पारस्परिकं स्नेहं सम्बर्द्धयेयुः, भार्या अपि भर्त्रे प्रयुक्तां कटूक्तिं विहाय सदा प्रियमेव ब्रूयात्। अतएव प्रिया च भार्या प्रियवादिनी चेति वाक्यमिममेव सङ्केतयति।

एवमिह सर्वतोभावेन मानवानां कृते पारस्परिकसुमतेः निर्देशः कृतः, यतो हि सुमतिरेव सम्पत्तिः, सा च मानवजीवनाय लोकोपकारकाय च सर्वश्रेष्ठा अस्ति। रामचरितमानसेऽपि उक्तम्—

**जहाँ सुमति तहँ सम्पति नाना ।**
**जहाँ कुमति तहँ बिपति निदाना ॥**

ऋग्वेदेऽपि कश्चनपुरुषः सुमतये विष्णुं प्रार्थयति यत् -

**महस्ते विष्णो सुमतिं भजामहे उर्वो गभीरा ।**

**सुमतिष्टेऽस्तु देवानां भद्रा सुमतिर्ऋजूयताम् ॥**

इत्यादि वेदवचनैः सुमतेः कामना इह निर्दिष्टा। अपि च, मानवानां कृते सम्पूर्णं राष्ट्रं प्रति सख्यभावमपि समुद्बोधितम्, यथा -

**दृते दृंहमा मित्रस्यं मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।**

**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे ॥**

अर्थात् हे महावीर मां दृढं कुरु, सर्वेऽपि प्राणिनः मित्रदृष्ट्या मां पश्यन्तु नारिदृष्ट्या। सर्वेषां प्रियो भूयासमित्यर्थः। अहमपि सर्वाणि भूतानि मित्रस्य चक्षुषा पश्यामि, सर्वे मे प्रियाः सन्तु। एवमिह परस्पराद्रोहेण सर्वान् अहिंसन्तो मित्रस्य चक्षुषा वयं पश्याम इति विवेचितमस्ति।

न केवलं चेतनोचित एव एष सन्देशः, अपितु अचेतनेष्वपि मैत्रीभावना अथर्ववेदे एवं प्रोक्तमस्ति यथा-सर्वा आशा मम मित्रं भवन्तु असपत्नाः प्रदिशो मे सन्तु, न वै त्वा द्विष्मो अभयं नोऽस्तु मानो द्विक्षत कश्चन।

एवं प्रकारेण वेद सर्वत्र मानवकल्याणाय नैतिकमूल्यानां समुपदेशः यथास्थानं सम्प्राप्यते। अपि च राष्ट्रीयैकतायै अखण्डतायै चास्माकं ऋग्वेदे मानवीयमूल्यानां संरक्षणाय संवर्द्धनाय चैष उपदेशो यथा -

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।**

**देवा भागं यथापूर्वे सञ्जानाना उपासते ॥**

अर्थात् स्वकल्याणार्थं राष्ट्ररक्षणार्थं च यूयं सङ्गता सम्भूता भवत, वदत परस्परं विरोधं परित्यज्य एकविधवाक्यं ब्रूत। युष्माकं मनांसि एकरूपमेवार्थमवगच्छन्तु। यथा पूर्वे पुरातना देवाः ऐकमत्यं प्राप्ता हविर्भागं स्वीकुर्वन्ति तथैव यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुत।

अपि च -

**समानी व आकूतिः समाना हृदयानि वः।**

**समानमस्तु वो मनो यथा वः सुसहासति ॥**

अस्यायं भावो यत् युष्माकमाकूतिः सङ्कल्पोऽध्यवसायः हृदयानि अन्तःकरणञ्च एकविधं भवेत्। एवमिह मानवानां कृते मनसा वाचा कर्मणा च सर्वदा समानेन भवितव्यमिति निगद्यते। मानवानां कृते परोपकारमुपदिशन् एवं प्रोक्तमस्ति यत् यः कश्चन् शरण्याय बुभुक्षिताय दुःखिने च समर्थः सन्नपि न परोपकारं करोति अपितु कार्पण्यं वित्तशाठ्यं च प्रदर्शयति स मानवः जीवन्नपि मृतः सन् परमपुरुषं परमात्मानं न प्राप्नोति। तथा चायं मन्त्रः -

**य आध्राय चकमानाय पित्वोऽन्नवान्त्सन् रफितायोपजग्मुषे ।**

**मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ॥**

**नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ।**

मानवानां कृते आध्यात्मिकसन्देशरूपेणापीदं प्रोक्तमस्ति यद् अस्मिन् जन्मनि देवदुर्लभं मानवशरीरं सम्प्राप्य परमात्मतत्त्वस्य बोधो न भवति चेत् तत् महादुःखकरं जन्मनो वैफल्यं चेति। अतएव केनोपनिषदि प्रोक्तं -

**इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।**

संसारसागरेऽस्मिन् जलजवदनासक्तः सन् सर्वत्र भगवतः सत्तायाः स्वरूपदर्शनं करणीयं, तथा ईश्वरेण यत्किमपि प्रदत्तं तत्र त्यागभावनया ग्रहणं, लोभवृत्तिं समापयन् भगवच्चिन्तनं च चित्ते सर्वतोभावेन सन्धारणीयम्। तथा चोक्तमीशोपनिषदि -

**ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥**
**यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।**
**सर्वभूतेषु चात्मानं ततो न विचिकित्सति ॥**

तदित्थं वैदिकसाहित्ये मानवीयमूल्यानां महत्त्वं सर्वतोभावेन दरीदृश्यते येषामनुशीलनेन मानवजीवनं सर्वदा कल्याणकरं भवतीति शम्।

**राजकुमार पिलवालः**
शोधछात्रः (साहित्य-विभाग)
श्री ला.ब.शा.रा.सं. विद्यापीठम्, नवदेहली - १६